শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীগুরুপৱনপুরাধীশায শ্রীকৃষ্ণায পরব্রহ্মণে নমঃ

শ্রী মেল্পত্তূর্ নারাযণভট্টতিরেঃ কৃতিষু

# ॥ শ্রীমন্নারাযণীযে একোনষষ্টিতমং দশকম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥শ্রীমন্নারাযণীযে একোনষষ্টিতমং দশকম্॥

## ৱেণুগানৱর্ণনম্

ৎৱদ্ৱপুর্নৱকলাযকোমলং
    প্রেমদোহনমশেষমোহনম্।
ব্রহ্ম তত্ত্ৱপরচিন্মুদাত্মকং
    ৱীক্ষ্য সম্মুমুহুরন্ৱহং স্ত্রিযঃ॥ **59.1**॥

মন্মথোন্মথিতমানসাঃ ক্রমা -
    ত্ত্ৱদ্ৱিলোকনরতাস্ততস্ততঃ।
গোপিকাস্তৱ ন সেহিরে হরে
    কাননোপগতিমপ্যহর্মুখে॥ **59.2**॥

নির্গতে ভৱতি দত্তদৃষ্টয -
    স্ত্ৱদ্গতেন মনসা মৃগেক্ষণাঃ।
ৱেণুনাদমুপকর্ণ্য দূরত -
    স্ত্ৱদ্ৱিলাসকথযাঽভিরেমিরে॥ **59.3**॥

কাননান্তমিতৱান্ ভৱানপি
    স্নিগ্ধপাদপতলে মনোরমে।
ৱ্যত্যযাকলিতপাদমাস্থিতঃ
    প্রত্যপূরযত ৱেণুনালিকাম্॥ **59.4**॥

মারবাণধুতখেচরীকুলং
    নির্ৱিকারপশুপক্ষিমণ্ডলম্।

দ্রাৱণং চ দৃষদামপি প্রভো
    তাৱকং ৱ্যজনি ৱেণুকূজিতম্॥ **59.5** ॥

ৱেণুরন্ধ্রতরলাঙ্গুলীদলং
    তালসঞ্চলিতপাদপল্লৱম্।
তৎ স্থিতং তৱ পরোক্ষমপ্যহো
    সংৱিচিন্ত্য মুমুহুর্ৱ্রজাঙ্গনাঃ॥ **59.6** ॥

নির্ৱিশঙ্কভৱদঙ্গদর্শিনীঃ
    খেচরীঃ খগমৃগান্ পশূনপি।
ৎৱৎপদপ্রণযি কাননং চ তাঃ
    ধন্যধন্যমিতি নন্ৱমানযন্॥ **59.7** ॥

আপিবেযমধরামৃতং কদা
    ৱেণুভুক্তরসশেষমেকদা।
দূরতো বত কৃতং দুরাশযে -
    ত্যাকুলা মুহুরিমাঃ সমামুহন্॥ **59.8** ॥

প্রত্যহং চ পুনরিত্থমঙ্গনা -
    শ্চিত্তযোনিজনিতাদনুগ্রহাৎ।
বদ্ধরাগৱিৱশাস্ত্ৱযি প্রভো
    নিত্যমাপুরিহ কৃত্যমূঢতাম্॥ **59.9** ॥

রাগস্তাৱজ্জাযতে হি স্ৱভাৱা -
    ন্মোক্ষোপাযো যত্নতঃ স্যান্ন ৱা স্যাৎ।
তাসাং ৎৱেকং তদ্দ্ৱযং লব্ধমাসীৎ
    ভাগ্যং ভাগ্যং পাহি মাং মারুতেশ॥ **59.10** ॥

॥ ইতি শ্রীমন্নারাযণীযে একোনষষ্টিতমং দশকং সমাপ্তম্॥